No. १३९३ क

Title आपदुद्धारणबटुकभैरवस्तोत्रम्.

Author

Extent १६ पत्र Age

Subject तन्त्र

श्रीपञ्चाशद्भगवटुकभैरवस्तोत्र

नं. १३५३

नं.

३४५

# 5853

Complete



भै·
१

ॐ नमः शिवाय ॐ मेरुपृष्ठे सुखासीनं देवदेवं म
हेश्वरं शंकरं परिपप्रच्छ पार्वती परमेश्वरं पार्वत्यु
वाच भगवन्सर्वधर्मज्ञ सर्वशास्त्रागमादिषु आ
पदुद्धारणं मंत्रं सर्वसिद्धिप्रदं नृणां सर्वेषां चैव
भूतानां हितार्थं वांछितं मया विशेषतस्तु राज्ञां
वै शांतिपुष्टिविवर्धनं अंगन्यासकरन्यासदे

ह्त्वा समसमन्वितं वक्त्रमर्हसि देवेषाममहर्ष
विवर्धनं ४ श्रीईश्वरउवाच शृणु देवि महामंत्र
मापदुद्धारहेतुकं सर्वदुःखप्रशमनं सर्वश
त्रुविनाशनं ५ अपस्मारादिरोगाणांज्वरादीनां
विशेषतः सर्वेषांस्मृतिमात्रेण मंत्रराजमिमं
प्रिये ६ सर्वकामार्थदं देवि राजभोगप्रदं नृणां

भै·
२

2

आपदुद्धारमिति यन्मंत्रं वक्ष्याम्यशेषतः ७ ग्रह
राजभयादीनां च नाशनं सुखवर्धनं स्नेहाद्वक्ष्यामि
ते मंत्रं वेदसारमिमं प्रिये ८ प्रणवं पूर्वमुद्धृत्य दे
वीप्रणवमुद्धरेत् वटुकायेति वै पश्चादापदुद्धा
रणाय च ९ कुरुद्वयं ततः पश्चाद्वटुकाय पुनः
क्षिपेत् देवीप्रणवमुद्धृत्य मंत्रोद्धारमिमं प्रिये

मंत्रोद्धारमिमं देवि त्रैलोक्ये चापि दुर्लभं अप्र
काश्यमिमं मंत्रं सर्वशक्ति समन्वितं ९ स्मरणा
देव मंत्रस्य भूतप्रेतपिशाचकाः विद्रवंत्यनिभी
तावै कालरुद्रादिवप्रजाः पठेद्वापाठयेद्वापि
पूजयेद्वापि पूजयेद्वापि पुस्तकं नाग्निचौरभयं
तत्र ग्रहराजभयं तथा १२ न च मारीभयं किंचि

त्वदेवसुखवान्भवेत् आयुरारोग्यमैश्वर्यपुत्र
पौत्रादिसंपदः भवंति सततं तस्य सुकलकस्या
पिपूजनात् पार्वत्युवाच कथं भैरवोनामआप
दुद्धारकोमतः १४ त्वयायः कथितो देव भैरवः क
ल्पवित्तमः तस्य नाम सहस्राणि अयुतान्यर्बुदा
नि च १५ सारमुद्धृत्य तेषां वै नामाष्टशतकं वद

यानिसंकीर्तयन्मर्त्यः सर्वदुःखविवर्जितः २९
सर्वान्कामानवाप्नोति साधकः सिद्धिमेव च ईश्व
रुवाच शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मन :
श्चापदुद्धारकस्येह नामाष्टशतमुत्तमं सर्वपा
पहरं पुण्यं सर्वापाधिनिवारणं सर्वकामार्थदं
देवि साधकानां शुभावहं नामाष्टशतकस्यास्य

छंदोनुष्टुप्कीर्तितं बृहदारण्यकोनामऋषिर्दे
वोथभैरवः सर्वकार्यार्थसिद्ध्यर्थे विनियोग इति
स्मृतः खट्वाङ्गं त्रिनयनमितिबीजं समाहितं
शक्तिकं कीलकं चैव मिष्टसिद्धौ नियोजयेत् ॥ रु
द्रमंगुष्ठयोर्न्यस्य तर्जन्योर्विशिखीशिखं शिवं
मध्यमयोर्न्यस्य नामिकायां त्रिशूलिनं ब्रह्मा

णोन्तकनिष्ठायां नलयोस्त्रिपुरान्तकं मांसाशिने
कराग्रेन्तकरण्हे दिगंबरं भैरवं मूर्ध्नि विन्यस्य
ललाटे भीमदर्शनं नेत्रयोर्भूतहननं सारमे
यान्तरां भ्रुवोः कर्णयोर्भूतनाथं चप्रेतवाहं क
पोलयोः नासिकापुटयोर्भैवभस्मांगं सर्पभूष
णं अनादिभूतमास्येच शाकिहस्तं गलेन्यसेत्

भै. स्कंधयोर्दैन्यशमनं बाह्वोरतुलतेजसम् पाण्योः क
५ पालिनं न्यसेद्धृदये मुंडमालिनं शोणितवक्षःस्थले न्य
सेत्स्तनयोः कामचारिणम् उदरे च सदा तुष्टं क्षेत्रे
5 शं पार्श्वयोस्तथा क्षेत्रपालं पृष्ठदेशे क्षेत्रज्ञं नाभि
देशके सर्वाघनाशिनं कट्यां वटुकं लिंगदेशके
गुदे रत्नाकरं न्यसेत् तयोर्वीरकलोचनं जानुनोर्ब्र

र्धुगशावैजंघयोरक्तपायिने गुल्फयोःपाडुका
सिद्धपादपृष्ठेमहेश्वरं आपादमस्तकंचैवव्याप
कंह्वारकंतथा पूर्वेडमरुहस्तंचदक्षिणेदंडधा
रिणं खड्गहस्तंपश्चिमेचचंटादिनमुत्तरे २८ आ
ग्नेय्यामग्निवर्णंचनैरृत्यांचदिगंबरं वायव्येस
र्वमूलस्थमीशान्यांसर्वसिद्धिदं २९ ऊर्ध्वेखेचरणं

मै॰
८
6

न्यसश्चयस्तात्स्वेषड्रूपिणं एवंविन्यस्यदेहेस्वेषडंगे
षुततोन्यसेत् ॐ हृदयेमृतनाथायश्चादिनाथाय
मूर्द्धनि आनंदपदपूर्वायथायाचशिखायाञ्च सि
द्धिमावरनाथायकवचेविन्यसेत्तथा सहजानंद
नाथायन्यसेन्नेत्रत्रयेतथा निःसीमानंदनाथा
यश्चास्त्रैचैवप्रयोजयेत् वीजपूर्वंविनिर्न्यस्यन्या

मेकुर्याद्धिचक्षणः एवंन्यासविधिंकृत्वायथा
वक्त्रदनेत्तरं ध्यानंतस्यप्रवक्ष्यामियथाध्यात्वाप
ठेन्नरः शुद्धस्फटिकसंकाशंसहस्रादित्यवर्चे
से नीलजीमूतसंकाशंनीलांजनसमप्रभं श्र
ष्टवाङ्कं त्रिनयनंचतुर्वाङ्कंद्विवाङ्कुकं दंष्ट्राकरा
लवदनेनूपुरारावसंकुलं भुजंगमेखलंदेव

भै.
७

मग्निवर्णशिरोरुहं दिगंबरं कुमारीशं वटुकाख्यं
महाबलं खट्वांगमसिपाशं च शूलं दक्षिणभाग
तः डमरुं च कपालं च वरदं भुजगं तथा अग्निव
र्णसमोपेतं सारमेयसमन्वितं ध्यात्वा जपेत्सु
संहृष्टः सर्वान्कामानवाप्नुयात् करकलितक
पालःकुंडलीदंडपाणिस्तरुणतिमिरनीलोव्या

7

लयज्ञोपवीती कृतसमयसपर्याविघ्नविच्छे
दहेतुर्जेयानिवटुकनाथः सिद्धिदः साधकानां
ॐ अस्य श्रीवटुकभैरवमंत्रस्य वृहदारण्यकऋ
षिः अनुष्टुप्छंदः श्रीवटुकभैरवोदेवता ह्रींबीजं
वटुकायेतिशक्तिः प्रणवंकीलकं अभीष्टकामना
सिद्ध्यर्थेजपेपाठेविनियोगः अथकरन्यासः ॐह्रां

मे॰
प
8

वां अंगुष्ठाभ्यां नमः ॐ ह्रीं वीं तर्जनीभ्यां स्वाहा ॐ ह्रूं वूं
मध्यमाभ्यां वषट् ॐ ह्रैं वैं अनामिकाभ्यां हुं ॐ ह्रौं
वौं कनिष्ठकाभ्यां वौषट् ॐ ह्रः वः करतलकरपृ
ष्ठाभ्यां फट् अथ हृदयादिन्यासः ॐ ह्रां वां हृदया
य नमः ॐ ह्रीं वीं शिरसे स्वाहा ॐ ह्रूं वूं शिखायै व
षट् ॐ ह्रैं वैं कवचाय हुं ॐ ह्रौं वौं नेत्राभ्यां वौषट्

ॐह्रः वः अस्त्राय फट् अथ मूलमंत्रन्यासः ॐह्रीं
अंगुष्ठाभ्यां नमः वट्कायतर्जनीभ्यां स्वाहा स्वा
पङ्ङारणाय मध्यमाभ्यां वषट् कुरुकुरुअना
मिकाभ्यां हुं वट्कायकनिष्ठकाभ्यां वौषट् ह्रीं
करनलकरपृष्ठाभ्यां फट् अथ हृदयादिन्यासः
ॐह्रीं हृदयाय नमः वट्काय शिरसे स्वाहा स्वा

भै· ५

षड्द्वारणायशिखायैवषट् कुरुकुरुकवचायहुं
म् वटुकायनेत्राभ्यांवौषट् झ्रीं अस्त्रायफट् इति
मंत्रन्यासः अथध्यानं ॐकारकलितकपालःकुं
डलीदंडपाणिः तरुणतिमिरनीलोव्यालयज्ञोप
वीती क्रतुसमयसपर्याविघ्नविच्छेदहेतुर्जयति
वटुकनाथः साधकानां १ अथसात्विकध्यानम्

9

वंदेबालंस्फटिकसदृशंकुंडलोद्भासिवक्त्रं दिव्याक
ल्पैर्नवमणिमयैःकिंकिणीनूपुराद्यैः दीप्ताकारंवि
शदवदनंसुप्रसन्नंमहेशंहस्ताब्जाभ्यांवटुकमनि
शंशूलखड्गौदधानं १ अथराजसध्यानम् उद्यद्भा
स्करसन्निभंत्रिनयनंरक्तांगरागस्त्रजं स्मेरास्यं
वरदंकपालमभयंशूलंदधानंकरैः नीलग्रीव

भै॰ सुदारभूषणयुतंपीनांगमुखेंदोज्ज्वलं बंधूकारुण
२१ वाससंभयहरंदेवंसदाभावयेत् २ अघोरनामस
ध्यानम् ध्यायेन्नीलाद्रिकांतंशशिशकलधरंमुं
10 डमालंमहेशं दिग्वस्त्रंपिंगकेशंडमरुमथसृ
णिंखड्गशूलाभयानि नागंघंटांकपालंकरसर
सिरुहैर्बिभ्रतंभीमदंष्ट्रं सर्पाकल्पंत्रिनेत्रंमणि

मयविलसत्किंकिणीनूपुराढ्यं इतिमन्त्रराजस्त

मोध्यानानि अथगायत्री वटुकायविद्महेआपदु

द्धारणायधिमहि तन्नोभैरवःप्रचोदयात् ३ अ

थमूलमंत्रः ॐह्रींवटुकायआपदुद्धारणायकु

रुकुरुवटुकायह्रीं इतिमंत्रः मूलमंत्रमष्टोत्तरश

तंप्रतिदिनंजपेत् तदनंतरंस्तोत्रपाठंकुर्यात्

भै·
११

ॐ भैरवो भूतनाथश्च भूतात्मा भूतभावनः क्षेत्र
ज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियो विराट् श्मशा
नवासी मांसाशी खर्पराशी स्मरान्तकृत् रक्तपः
प्राणपः सिद्धः सिद्धिदः सिद्धसेवितः कंकालः
कालशमनः कलाकाष्ठातनुः कविः त्रिनेत्रो
बहुनेत्रश्च तथा पिंगललोचनः शूलपा

णिः खड्गपाणिः कंकाली धूम्रलोचनः अभीरुर्भै
रवीनाथो भूतिदो योगिनीपतिः यनदो यनहारी
चयनवान् प्रतिभानवान् नागहारो नागपाशो
व्योमकेशः कपालभृत् कालः कपालमालीच
कमनीयः कलानिधिः त्रिलोचनोज्वलन्नेत्रस्त्रि
शिखीच त्रिलोकपः त्रिनेत्रतनयो डिंभः शां

भै॰ १२

12

तः शांतजनप्रियः वटुको वटुकेशश्च देहांगावर
धारकः भूतनाथस्तः पशुपतिर्भिक्षुकः परिचारकः
धूर्त्तो दिगंबरः शूरो हरिणः पांडुलोचनः प्रशांतः
शांतिदः शुद्धः शंकरप्रियबांधवः अष्टमूर्त्तिर्निधी
शश्च ज्ञानचक्षुस्तपोमयः अष्टाधारः षडाधारः स
र्पयुक्तः शिखीसखः भूधरो भूधराधीशो भूपतिर्भू

धरात्मजः कंकालधारीमुंडीचर्म्माव्रयज्ञोपवीत
वान् जृंभणोमोहनस्तंभीमारणःक्षोभणस्तथा
शुद्धनीलांजनप्रख्योदैत्यहामुंडभूषितः वलि
भुग्बलिभुङ्नाथोबालोबालपराक्रमः सर्वाप
त्तारणोदुर्गोदुष्टभूतनिषेवितः कामीकलानि
धिकांतःकामिनीवशकृद्वशी सर्वसिद्धिप्रदो

भै· वैद्यः प्रभविष्णुरितीवहि ॥ अष्टोत्तरशतेनाम्नांभैरव
१३ स्यमहात्मनः मयातेकथितंदेविरहस्यंसर्वकाम
दं यइदंपठतेस्तोत्रंनामाष्टशतमुत्तमं नतस्यदु
13 रितंकिंचिन्नरोगाणांभयंनतथा नशत्रुभ्योभयंकिं
चित्प्राप्नुयान्मानवःक्वचित् पातकानांभयंनैव
पठेत्स्तोत्रमनुत्तमं मारीभयेराजभयेनतथाचौरा

ग्निजेभये श्रौत्पातिकेमहाघोरेतथाङःस्वप्नजेभ
ये बंधनेचतथाघोरेपठेच:स्तोत्रमुत्तमं सर्वप्र
शमनायातिभयंभैरवकीर्तनात् एकादशसह
स्रंतुपुरश्चरणमुच्यते यःत्रिसंध्यंपठेद्देविसंवत्स
रमतंद्रितः सिसिद्धिंप्राप्नुयादिष्टांदुर्लभामपिमा
नवैः षण्मासंभूमिकामस्तुजपित्वाप्राप्नुयात्स

भै॰ ह्रीं राजा शत्रुविनाशार्थं जपेन्मासाष्टकं विभुं रा
२४ त्रौ वारत्रयं देवि नाशायत्स्ये विशात्रवम् धर्मार्थी
वा सुतार्थी च दारार्थी यस्तु मानवः पठेन्मासत्र
यं देवि वारमेकं तथा निशि यत्ने पुत्रांस्तथा दारा
न्प्राप्नुयान्नात्र संशयः रोगात्प्रमुच्यते न देवि सत्यं
सत्यं न संशयः निगडैर्बद्धापि वध्यो यः कारागृह

विमुक्तिदः शृंखलाबंधनं प्राप्तः पठेच्चैव दिवानि
शं यो यो समीहते कामांस्तांस्तांप्राप्नोति मानवः
अप्रकाश्यमदातव्यं न देयं यस्य कस्यचित् भक्ति
लीनाय शान्ताय ऋजवे विनयशीलिने च स्तोत्र
मिदं पुण्यं सर्वकामफलप्रदम् भैरवोपि प्रस
न्नोभूत्स्वयं च महेश्वरः एवं श्रुत्वा ततो देवी

भै·
१५

नामायचातमुत्तमम् संतोषं परमं प्राप्य भैरवस्य
महात्मनः संजप्यं परया भक्त्या सदा सर्वैश्वरेश्वरि
देवि स्तोत्रमिदं पुण्यं सर्वकामफलप्रदं पठित्
वा ततो देवि नाम्नां महोत्तरे घाते प्राप्नुयात्परमा
मिष्टां वाणीं लक्ष्मीं न संशयः इति श्रीरुद्रयाम
ले तंत्रे उमामहेश्वरसंवादे श्रीपडक्षारणवट्

कभैरवस्तोत्रं समाप्तम् ॥ त्रिकोणं एवं तत बटु
रस्तं विलिख्य" तत्र स जलं पात्रं संस्थाप्यं ह्रींत्या
धार प्राळयेनमः इति मंत्रेण" तल्लिख, एहीति
देवीपुत्र वटुक नाथ कपिल जटाभार भासुर त्रि
नेत्र ज्वालामुख मम सर्वविघ्नान् नाशय नाशय
सर्वोपचार सहितं बलिं गृह्ण २ स्वाहेति बलिं
स्थापयेत् ॥





[illegible]